# तिस्रैषणीयं अध्याय:|

## (चरकसंहिता सूत्रस्थानं एकादशोऽध्याय:)


PROF. VD. NILESH G. KULKARNI

MD (AYU.), MA (SANSKRIT)

HEAD, DEPT. OF SAMHITA – SIDDHANTA,

MAM'S SSAM, HADAPSAR, PUNE – 28

# प्रतिपादित प्रकरणं

1) चतुष्कपरिचय:
2) अध्यायपरिचय:
3) एषणापरिचय:
4) एषणानिर्देश:
5) “सदसद् सर्वस्य” चतुर्विधापरीक्षा निर्देश:
6) चतुर्विधपरीक्षा अपेक्षया परलोकसिद्धी
7) परलोकप्राप्ति उपकरणानि
8) सप्त-त्रिकाणि

# निर्देश चतुष्क

- चतुष्कप्रयोजन - स्वस्थातुरहितं वैद्यभेषजादि निर्दिशतीति| च.सू.९/१ (चक्र)

1. खुड्डाक चतुष्पाद
2. महा चतुष्पाद
3. तिस्रैषणीयं – पूर्वाध्याये चतुष्पादमारोग्यकारणं व्यवस्थापितं, ततश्चतुष्पादसम्पत्त्या प्राप्तारोग्येण सता प्राणपरिपालनसाधनं, तथा धनार्जनसाधनं, तथा धर्मार्जनसाधनं यदनुष्ठेयं तदिहैषणात्रयरूपमभिधीयत। (चक्र)
4. वातकलाकलीयं

# तिस्रैषणीयं अध्याय:

➢ अध्याय अधिकर्ता –

- भोगार्थिपुरुषः| च.सू.11/3 (चक्र)
- मोक्षार्थिपुरुषं प्रति धनैषणा सर्वथैवानुपयुक्ता| चक्र
- पुरुषेणेति पदं कुर्वन् य एव पुरुष एषणात्रयमन्विष्यति स एव पुरुषो भण्यते नान्यः, पशुतुल्यत्वादिति दर्शयति | चक्र

# एषणा परिचय

- एषणा = इष्यते अन्विष्यते साध्यते अनयेति एषणा | चक्र
- अनुपहत सत्त्वबुद्धिपौरुषपराक्रमेण पुरुषेण, हितं इह तिस्र एषणाः पर्येष्टव्या भवन्ति, इह च अमुष्मिंश्च लोके समनुपश्यता| च.सू.11/3
- तद्यथा- प्राणैषणा, धनैषणा, परलोकैषणेति|| च.सू.11/3

# प्राणैषणा

- प्रथम वर्णन

- कस्मात्? = प्राणपरित्यागे हि सर्वत्यागः। च.सू.11/4
- तस्य साधनं? = स्वस्थस्य स्वस्थवृत्तानुवृत्तिः, आतुरस्य विकारप्रशमनेऽप्रमादः, तदुभयमेतदुक्तं वक्ष्यते च|च.सू.11/4

(वक्ष्यते चेति निखिलेन शास्त्रेण। चक्र)

- फल - यथोक्तमनुवर्तमानः प्राणानुपालनाद्दीर्घमायुरवाप्नोतीति|च.सू.11/4

# धनैषणा

- द्वितीय एषणा

- हेतू - यदनुपकरणस्य दीर्घमायुः , न ह्यतः पापात् पापीयोऽस्ति|च.सू.11/5
  - तस्मादुपकरणानि पर्यैष्टुं यतेत । च.सू.11/5
  (उपकरणम् आरोग्यभोगधर्मसाधनीभूतो धनप्रपञ्चः, स यस्य नास्त्यसावनुपकरणः| चक्र)
- उपकरणोपाय - कृषि पशुपाल्य वाणिज्य राजोपसेवादीनि,
  - यानि चान्यान्यपि अविगर्हितानि कर्माणि| च.सू.11/5
- फल - तथा कुर्वन् दीर्घजीवितं जीवत्यनवमतः पुरुषो भवति| च.सू.11/5
  (अनवमतः बहुमानगृहीत| चक्र)

- Its money who teaches us who's important and who's not, even when you have it or you don't!! -Malcom Forbes

# परलोकैषणा

- तृतीय एषणा
- संशयः- किं नु खल्वस्ति पुनर्भवो न वेति॥ च.सू.11/6

# संशयहेतू

- इतश्च्युता भविष्याम, नवेति|च.सू.11/6

- पुनर्भव  खंडन -

1) नास्ति  पुनर्भव – पुनर्भवस्य प्रत्यक्षपराः  परोक्षत्वात्,  नास्तिक्यमाश्रिताः ह्येके  सन्ति| च.सू.11/6

2) अस्ति  पुनर्भव - चागमप्रत्ययादेव  पुनर्भवमिच्छन्ति सन्ति  |च.सू.11/6

- मंडन - बुद्धिमान्नास्तिक्यबुद्धिं  जह्याद्विचिकित्सां  च|च.सू.11/7
  - कस्मात्? = प्रत्यक्षं  ह्यल्पम्;  अनल्पमप्रत्यक्षमस्ति|च.सू.11/7
  - प्रत्यक्षानुपलब्धिः = रूपाणामतिसन्निकर्षात्, अतिविप्रकर्षात्, आवरणात्, करणदौर्बल्यात्, मनोनवस्थानात्, etc

# संशयहेतू

1. श्रुतिभेद

मातरं पितरं चैके मन्यन्ते जन्मकारणम् ।
स्वभावं परनिर्माणं यदृच्छां चापरे जनाः ।।

- जन्मकारण - A) मातापिता
  - B) स्वभाव
  - C) परनिर्माणं
  - D) यदृच्छां

# श्रुतिभेदखंडन श्रुतिमंडन

- खंडन - श्रुतयश्चैता न कारणं, युक्तिविरोधात् । च.सू.11/9

A. <u>जन्मकारण - मातापिता</u>

- मंडन – मातुःपितुः आत्मा यदि सञ्चरेत् – सर्वोवा अवयवेनवा| च.सू.11/9

✓ सर्वोवा = मातुःपितुर्वा मरणं भवेत्| च.सू.11/9

✓ अवयवेनवा = कश्चित्सूक्ष्मस्य चात्मनः, नावयवः|| च.सू.11/9

# श्रुतिभेदखंडन श्रुतिमंडन

B. स्वभाव-

- खंडन - ६ धातु (महाभूत+आत्मा) स्वलक्षण - स्वभाव
- मंडन - तस्य संयोगविभाग - कर्म एव कारणम्| च.सू.11/12

C. परनिर्माणं-

- खंडन - आत्मारहितस्य परेण निर्माणम् अभिप्रेतम्|
- मंडन - अनादे: चेतनाधातुः | च.सू.11/13

# श्रुतिभेदखंडन श्रुतिमंडन

D. यदृच्छा-

- खंडन- नास्ति =

| | | | |
|---|---|---|---|
| परीक्षा | परीक्ष्यं | कर्ता | कारणं |
| देवा | ऋषी | कर्म | कर्मफलं |
| आत्मा | | | |

- मंडन – नास्तिकग्रहः पातकं , पातकेभ्यः परं । च.सू.11/15

# श्रुतिभेदखंडन श्रुतिमंडन

- तस्मात्  बुधः –

  अममार्गप्रसृतां मतिं विमुच्यैः सतां,

  बुद्धिप्रदीपेन  सर्वं यथातथम् पश्येत्|| च.सू.11/16
- सर्वं द्विविधमेव  खलु - सत्  असत्
- तस्य परीक्षा  चतुर्विधा - आप्तोपदेशः, प्रत्यक्षम्

  अनुमानं, युक्तिः
- एषा  परीक्षा, नस्ति  अन्या- च.सू.11/26
- यया सदसच्चैवं  सर्वं  परीक्ष्यं  परीक्ष्यते - च.सू.11/26
- तया  चास्ति  पुनर्भवः||  च.सू.11/26

# चतुर्विधा परीक्षा

- <u>आप्ताः</u> = ये तपोज्ञानबलेन रजस्तमोभ्यां निर्मुक्ता
  येषां त्रिकालममलं ज्ञानमव्याहतं सदा
- पर्याय - आप्ताः शिष्टा विबुद्धाः
- तेषां वाक्यमसंशयम् सत्यं। च.सू.11/19

- <u>प्रत्यक्षं</u> - या बुद्धिः आत्मेन्द्रियमनोर्थानां सन्निकर्षात्
  तदात्वे व्यक्ता प्रवर्तते। च.सू.11/20

  (तदात्वे - तत् क्षणम्। चक्र)

# चतुर्विधा परीक्षा

➢ <u>अनुमान</u> - प्रत्यक्षपूर्वं त्रिविधं त्रिकालं चानुमीयते|च.सू.11/21

(त्रिविधं इति अनुमान त्रैविद्ध्यं दर्शयति| चक्र)

1. सामान्यतो दर्शनादनुमानं(चक्र)- वह्निर्निगूढो धूमेन| च.सू.11/21
2. कार्यात् कारणानुमानं(चक्र)- गर्भदर्शनान्मैथुनानुमानं| च.सू.11/22
3. कारणात् कार्यानुमानं(चक्र)- दृष्ट्वा बीजात् फलं जातमिहैव सदृशं|च.सू.11/22

➢ <u>युक्तिः</u> - बहुकारणयोगजान् भावान् या बुद्धिः पश्यति(विषयी करोति- चक्)

सा युक्तिः त्रिकाला| च.सू.11/25

- यया त्रिवर्गः साध्यते| च.सू.11/25

# आयुर्वेदशास्त्रेषु  पुनर्जन्मप्रतिपादित साधनं

- आप्तोपदेशः – च.सू.11/29

ब्रह्मपरै आप्तैः =

- धर्मद्वारावहितैः
- व्यपगत भय-राग-द्वेष-लोभ-मोह-मानैः
- कर्मविद्भिः
- अनुपहत सत्त्वबुद्धिप्रचारैः (एतेन  विशुद्धबुद्धित्वं  दर्शयति- चक्र)
- पूर्वैःपूर्वतरै, र्महर्षिभिः दिव्यचक्षुभि दृष्ट्वा उपदिष्टः  पुनर्भव|

# आयुर्वेदशास्त्रेषु पुनर्जन्मप्रतिपादित साधनं

❑ प्रत्यक्ष – च.सू.11/30

- मातापित्रोर्विसदृशान्यपत्यानि
- तुल्यसम्भवानां वर्णस्वराकृतिसत्त्वबुद्धिभाग्यविशेषाः
- प्रवरावरकुलजन्म दास्यैश्वर्यं
- सुखासुखमायुः आयुषो वैषम्यम्
- इह कृतस्यावाप्तिः
- अशिक्षितानां च रुदित-स्तनपान-हास-त्रासादीनां प्रवृत्तिः

(रुदितादयो- अव्युत्पन्नबाल गोचरतया बोद्धव्याः| चक्र)

- मेधा क्वचित् क्वचित् कर्मण्यमेधा
- समदर्शने प्रियाप्रियत्वम्

# आयुर्वेदशास्त्रेषु पुनर्जन्मप्रतिपादित साधनं

- अनुमान – च.सू.11/31

- दैवसञ्ज्ञक - यत् स्वकृतम् अपरिहार्यं अविनाशि पौर्वदेहिकं अनुबन्धिकं कर्म|
  - तस्यैतत् फलम्, इतश्च अन्यद् अविष्यतीति|

  (इतश्च - इह जन्मनि कृतात् कर्मणः, अन्यदिति भाविजन्मान्तरं| चक्र)
- फलद्बीजमनुमीयते, फलं च बीजात्|

- युक्ति -

| | |
|---|---|
| • षड्धातुसमुदयाद्गर्भजन्म | कर्तृकरणसंयोगात् क्रिया |
| • कृतस्य कर्मणः फलं नाकृतस्य | नाङ्कुरोत्पत्तिरबीजात् |
| • कर्मसदृशं फलं | नान्यस्माद्बीजादन्यस्योत्पत्तिः |

# परलोकप्राप्ति उपकरणानि

- फल - तथा कुर्वन्निहचैव यशो लभते प्रेत्य च स्वर्गम्| च.सू.11/33
- उपकरण –

| | | |
|---|---|---|
| गुरुशुश्रूषायाम् अध्ययने | व्रतचर्यायां | दारक्रियायाम् अपत्योत्पादने |
| भृत्यभरणे | अतिथिपूजायां | दाने |
| अनभिध्यायां | तपस्यनसूयायां | देहवाङ्मानसे कर्मण्यक्लिष्टे |

यानि च अन्यान्य अपि एवंविधानि कर्माणि सतां अविगर्हितानि| च.सू.11/33

# सप्त-त्रिक

- स्वस्थातुरहिततत्वेन वक्तव्यान्| चक्र

1. त्रय उपस्तम्भाः – प्रथममुपस्तम्भा अभिधीयन्ते मूलभूतशरीरधारकत्वेन|
2. त्रिविधं बलं- बलं उमुपस्तम्भाहारादिजन्यत्वात् तदनु |
3. त्रिणी आयतनानि - बलविरोधकर्तृत्वेन तदनु|
4. त्रयो रोगाः - रोगास्तज्जन्यत्वेन तदनु|
5. त्रयो रोगमार्गाः - तन्मार्गज्ञानं सुविन्यस्तमेव तदनु|
6. त्रिविधा भिषजः - रोगप्रतिषेधार्थं प्रधानकारणम् तदनु|
7. त्रिविधमौषधम् - तदनु तदुपकरणत्वेन भैषज्यम्|

# सप्त-त्रिक

- त्रयोपस्तम्भ - आहारः स्वप्नो ब्रह्मचर्यमिति। च.सू.11/35
- एभिः उपपस्तम्भैः र्युक्तियुक्तै उपस्तब्धम् शरीरं।
- बलवर्णोपचयः उपचितम् अनुवर्तते।

- त्रिविधं बलं – सहजं कालजं युक्तिकृतं च। च.सू.11/36
- सहजं यच्छरीरसत्त्वयोः प्राकृतं।
- कालकृतमृतुविभागजं वयःकृतं च।
- युक्तिकृतं आहार-चेष्टा योगजम्।

# सप्त-त्रिक

- त्रिणी आयतनानि - च.सू.11/37

A. अर्थानां चातियोगायोगमिथ्यायोगाः | = असात्म्येन्द्रियार्थसंयोगः
B. कर्मणः चातियोगायोगमिथ्यायोगाः | = प्रज्ञापराधः
C. कालस्य चातियोगायोगमिथ्यायोगाः | = परिणामः

✓ त्रयस्त्रिविधविकल्पा विकाराणां हेतवो| च.सू.11/43

✓समयोगयुक्तास्तु प्रकृतिहेतवो भवन्ति| च.सू.11/43

# सप्त-त्रिक

A) अर्थानां चातियोगायोगमिथ्यायोगाः| च.सू.11/37

1) दर्शनमतियोगः - तत्रातिप्रभावतां दृश्यानामतिमात्रं दर्शनमतियोगः

2) दर्शनमयोगः - सर्वशोऽदर्शनमयोगः

3) दर्शनमिथ्यायोगः- अतिश्लिष्ट अतिविप्रकृष्ट रौद्र भैरवात्
भूतद्विष्ट-बीभत्सन-विकृत-वित्रासनादि रूपदर्शनं मिथ्यायोगः|

1) श्रवणमतियोगः – आतिमात्र तनितपटहोत्क्रुष्टादीनां शब्दानामतिमात्रं|
(तनित-प्रवृद्धो मेघध्वनिः- चक्र)

2) श्रवणमयोगः - सर्वशोऽश्रवणमयोगः|

3) श्रवणमिथ्यायोगः – परुषेष्टविनाश उपघात-प्रधर्षण-भीषणादि शब्दश्रवणं मिथ्यायोगः|

# सप्त-त्रिक

1) घ्राणमतियोगः – तथाऽतितीक्ष्णोग्राभिष्यन्दिनां गन्धानामतिमात्रं घ्राणमतियोगः।
2) घ्राणमयोगः - सर्वशोऽघ्राणमयोगः
3) घ्राणमिथ्यायोगः – पूति द्विष्ट अमेध्य क्लिन्न विष-पवन-कुणपगन्धादि घ्राणं मिथ्यायोगः।

1) रसानामतियोगः – रसानाम् अत्यादानम् अतियोगः।
2) रसानामयोगः - सर्वशो अनादानमयोगः।
3) रसानामिथ्यायोगः – राशिवर्ज्येषु आहारविधिविशेषायतनेषु उपदेक्ष्यते मिथ्यायोगः।

# सप्त-त्रिक

1) स्पृश्यानामतियोगः – अतिशीतोष्णानां स्पृश्यानां स्नानाभ्यङ्गोत्सादनादीनां चात्युपसेवनमतियोगः।

2) स्पृश्यानामयोगः – सर्वश अनुपसेवनमयोगः।

3) स्पृश्यानां मिथ्यायोगः – स्नानादीनां शीतोष्णादीनां च स्पृश्यानाम् अनानुपूर्व्योपसेवनं विषमस्थानाभिघात अशुचिभूतसंस्पर्शात् मिथ्यायोगः।

# सप्त-त्रिक

B) कर्मणः  चातियोगायोगमिथ्यायोगाः – च.सू.11/39

✓कर्म  वाङ्मनःशरीरप्रवृत्तिः|

✓त्रिविधविकल्पं  त्रिविधमेव  कर्म  <u>प्रज्ञापराध</u>  इति  व्यवस्येत्| च.सू.11/41

1) वाङ्मनःशरीरातियोगः – वाङ्मनःशरीरातिप्रवृत्तिरतियोगः
2) वाङ्मनःशरीरायोगः – सर्वशोऽप्रवृत्तिरयोगः
3) शारीर मिथ्यायोगः – वेगधारणोदीरण विषमस्खलनपतन  अङ्गप्रणिधाना अङ्गप्रदूषण प्रहार मर्दन प्राणोपरोध सङ्क्लेशनादिः  शारीरो  मिथ्यायोगः|
4) वाङ् मिथ्यायोगः -   सूचक अनृत अकाल कलह अप्रिय अबद्धानुपचार परुषवचनादि र्वाङ्मिथ्यायोगः|

# सप्त-त्रिक

C) कालस्य चातियोगायोगमिथ्यायोगाः | च.सू.11/42

✓शीतोष्णवर्षलक्षणाः पुनर्हेमन्तग्रीष्मवर्षाः संवत्सरः, स कालः ।

✓कालः पुनः परिणाम उच्यते॥

1) कालातियोगः – तत्रातिमात्रस्वलक्षणः कालः कालातियोगः|

2) कालायोगः – हीनस्वलक्षणः कालायोगः|

3) कालः मिथ्यायोगः – यथास्वलक्षणविपरीतलक्षणस्तु कालमिथ्यायोगः|

# सप्त-त्रिक

- त्रयो रोगाः – निजागन्तुमानसाः| च.सू.11/45
  - निज – शारीरदोषसमुत्थः|
  - आगन्तु – भूतः विषः वायुः अग्निः सम्प्रहारादि समुत्थ|
  - मानसः - पुनरिष्टस्य लाभाल्लाभाच्चानिष्टस्य उपजायते|

- त्रयो रोगमार्ग - शाखा, मर्मास्थिसन्धयः, कोष्ठश्च| च.सू.11/48
  - शाखा - रक्तादयो धातवस्त्वक् च| स बाह्यो रोगमार्गः|
    - विसर्प श्वयथु गुल्मा अर्शो विद्रध्यादयः शाखानुसारिणो भवन्ति रोगाः| च.सू.11/49

# सप्त-त्रिक

- मध्यमो रोगमार्गः - मर्माणि पुनर्बस्तिहृदयमूर्धादीनि अस्थिसन्धयोऽस्थि संयोगास्तत्रोपनिबद्धाश्च स्नायुकण्डराः| च.सू.11/48
    - पक्षवध ग्रह अपतानक अर्दित शोष राजयक्ष्मा अस्थिसन्धिशूल गुदभ्रंशादयः शिरोहृद्बस्तिरोगादयश्च मध्यममार्गानुसारिणो भवन्ति रोगाः;

- रोगमार्ग आभ्यन्तरः - कोष्ठः पुनरुच्यते महास्रोतः शरीरमध्यं महानिम्नमामपक्वाशयश्चेति पर्यायशब्दैस्तन्त्रे|
    - ज्वर अतीसार छर्दि अलसक विसूचिका कास श्वास हिक्का आनाह उदर प्लीहादयो अन्तर्मार्गजाश्च विसर्प श्वयथुगुल्मार्शोविद्रध्यादयः कोष्ठानुसारिणो भवन्ति रोगाः|

# सप्त-त्रिक

- त्रिविधा भिषज – छद्मचराः, सिद्धसाधिताः, वैद्यगुणैर्युक्ता। च.सू.11/50
- छद्मचराः - वैद्यभाण्डौषधैः पुस्तैः पल्लवैरवलोकनैः ।

  लभन्ते ये भिषक्शब्दमज्ञास्ते प्रतिरूपकाः||च.सू.11/51
- सिद्धसाधिताः- श्रीयशोज्ञानसिद्धानां व्यपदेशादतद्विधाः ।

  वैद्यशब्दं लभन्ते ये ज्ञेयास्ते सिद्धसाधिताः ||च.सू.11/52

  (व्यपदेशः अन्यसम्बन्धेन कीर्तनम्। अतद्विधा ज्ञानहीनाः॥ चक्र)
- वैद्यगुणैर्युक्ता - प्रयोगज्ञानविज्ञानसिद्धिसिद्धाः सुखप्रदाः ।

  जीविताभिसरास्ते स्युर्वैद्यत्वं तेष्ववस्थितमिति ||च.सू.11/53

(प्राणाभिसरः - भिषक् चतुष्टये युक्तः प्राणाभिसर उच्यते|खुड्डाक चतुष्पाद

- (दशप्रणायतन)जानीते यः स वै विद्वान् प्राणाभिसर उच्यते| दशप्राणायतानानीयं )

# सप्त-त्रिक

- त्रिविधमौषधम् – दैवव्यपाश्रयं, युक्तिव्यपाश्रयं, सत्त्वावजयश्च| च.सू.11/54
- दैवव्यपाश्रयं - मन्त्र औषधि मणि मङ्गल बल्य उपहार होम नियम प्रायश्चित्त उपवास स्वस्त्ययन प्रणिपातगमनादि|
- युक्तिव्यपाश्रयं – पुन: आहार औषधद्रव्याणां योजना|
- सत्त्वावजयः – पुन: अहितेभ्यो अर्थेभ्यो मनोनिग्रहः|

# सप्त-त्रिक

- त्रिविधमौषधम् - अन्तःपरिमार्जनं, बहिःपरिमार्जनं, शस्त्रप्रणिधानं चेति। च.सू.11/55

✓शरीरदोषप्रकोपे खलु शरीरमेवाश्रित्य प्रायशस्त्रिविधमौषधमिच्छन्ति।

- अन्तःपरिमार्जनं – यदन्तःशरीरम् अनुप्रविश्य औषधम् आहारजातव्याधीन् प्रमार्ष्टि।
- बहिःपरिमार्जनं – बहिःस्पर्शम् आश्रित्य आभ्यङ्ग स्वेद प्रदेह परिषेक उन्मर्दनाद्यैः आमयान् प्रमार्ष्टि।
- शस्त्रप्रणिधानं – श्छेदन भेदन व्यधन दारण लेखन उत्पाटन प्रच्छन सीवन एषण क्षार जलौकसश्चेति।

# भवन्ति चात्र

- प्राज्ञो रोगे समुत्पन्ने बाह्येनाभ्यन्तरेण वा । कर्मणा लभते शर्म शस्त्रोपक्रमणेन वा॥५६॥
  बालस्तु खलु मोहाद्वा प्रमादाद्वा न बुध्यते । उत्पद्यमानं प्रथमं रोगं शत्रुमिवाबुधः॥५७॥
  अणुर्हि प्रथमं भूत्वा रोगः पश्चाद्विवर्धते । स जातमूलो मुष्णाति बलमायुश्च दुर्मतेः॥५८॥

- न मूढो लभते सञ्ज्ञां तावद्यावन्न पीड्यते। पीडितस्तु मतिं पश्चात् कुरुते व्याधिनिग्रहे॥५९॥
  अथ पुत्रांश्च दारांश्च ज्ञातींश्चाहूय भाषते । सर्वस्वेनापि मे कश्चिद्भिषगानीयतामिति॥६०॥

- तथाविधं च कः शक्तो दुर्बलं व्याधिपीडितम् । कृशं क्षीणेन्द्रियं दीनं परित्रातुं गतायुषम् ॥६१॥
  स त्रातारमनासाद्य बालस्त्यजति जीवितम् । गोधा लाङ्गूलबद्धेवाकृष्यमाणा बलीयसा ॥६२॥
  तस्मात् प्रागेव रोगेभ्यो रोगेषु तरुणेषु वा । भेषजैः प्रतिकुर्वीत य इच्छेत् सुखमात्मनः ॥६३॥

# धन्यवाद: !!